**एम॰ ए॰ संस्कृतम्**

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

सप्तमं पत्रम् (msk 07) - **वैदिकवाङ्गमयम्**

**प्रदत्तकार्यम्-1** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. कानि कानि संवादसूक्तानि ? नामानि लिखत ।

ख. राष्ट्राभिवर्धनसूक्तं कस्मिन् वेदे वर्तते ? का च तस्य सूक्तसंख्या ?

ग. केनोपनिषद् केन वेदेन सम्बद्धा वर्तते ?

घ. दैवतकाण्डे कति अध्यायाः सन्ति ।

ङ लेट् लकारस्य उदाहरणानि लिखत ।

च. केनोपनिषदः सूक्तिपरकम् एकं मन्त्रं लिखत ।

**2.** क. निर्धारितसूक्तेषु स्वयमेव मन्त्राणां चयनं कृत्वा द्वयोः मन्त्रयोः व्याख्या विधेया ।

ख. वरुणसूक्तस्य अथवा शिवसंकल्पसूक्तस्य सारं लिखत ।

**3.** क. प्रथमे खण्डे वर्णितम् **उपास्यब्रह्मणः निर्गुणब्रह्मणश्च मध्ये भेदः** इति विषयं विवेचयत ।

ख. केनोपनिषदः सारं लिखत ।

**4.** क. का ऋक् कतिविधा च सा इति सोदाहरणं स्पष्टीक्रियताम् ।

ख. किं देवाः पुरुषविधा अपुरुषविधाः वा उत उभयविधा इति मतत्रयम् उद्घाट्य सर्वं

स्पष्टीक्रियताम् ।

**5.** क. वैदिकलौकिकभाषयोः अन्तरं स्पष्टयत ।

ख. वैदिकस्वराणाम् अथवा लेट् लकारस्य परिचयं प्रयच्छत ।

## **एम॰ ए॰ संस्कृतम्**

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

सप्तमं पत्रम् (msk 07) - **वैदिकवाङ्गमयम्**

**प्रदत्तकार्यम्-2** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. अश्विनौ सूक्ते कति मन्त्राः ?

ख. शिवसंकल्पसूक्तं कस्मिन् वेदे वर्तते ? सूक्तेऽस्मिन् कियत्यः ऋचः सन्ति ?

ग. उमा - हैमवती आख्यानं कुत्र मिलति ?

घ. निरुक्ते कतिविधाः देवताः वर्णिताः सन्ति ।

ङ वेदे कतमः लकारः प्रयुज्यते ।

च. केनोपनिषद् केन ब्राह्मणेन सम्बद्धा अस्ति ?

**2.** क. निर्धारितसूक्तेषु स्वयमेव मन्त्राणां चयनं कृत्वा द्वयोः मन्त्रयोः व्याख्या विधेया ।

ख. अश्विनौ सूक्तस्य अथवा पुरुरवा - उर्वशी संवादसूक्तस्य सारं लिखत ।

**3.** क. इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीन्महती विनष्टिः॰ मन्त्रस्यास्य संस्कृतेन व्याख्यां कुरुत ।

ख. ब्रह्मणः अनिर्वचनीयता विषये लिखत ।

**4.** क. दैवतकाण्डस्य सारं लिखत ।

**5.** क. वेदेषु पदपाठः कथं भवति ? वर्णनं क्रियताम् ।

ख. वैदिकशतृ-शानचप्रत्यययोः अथवा वैदिकसन्धेः परिचयं प्रयच्छत ।

**स्नातकोत्तर संस्कृतम्**

*(M.A. SAMSKRIT) 2nd Sem* **द्वितीयं सत्रम्**

**द्वितीयपत्रम् - व्याकरणम्** (Msk08)

**प्रदत्तकार्यम्** – 1 **अङ्काः**

- 15

**निर्देशः** - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।

1. **पञ्चप्रश्नानां** संक्षेपेण उत्तरं प्रदेयम् –

क. भूधातोः लट् लकारस्य रूपाणि लिखत ।

ख. एध् धातोः लिट् लकारस्य रूपाणि लिखत ।

ग. "परोक्षे लिट्" सूत्रस्य कः अर्थः ? सोदाहरणं लिखत ।

घ. पञ्चमीविभक्तिविधायकसूत्रं किम् ?

ङ. 'विजयते' अत्र केन सूत्रेण आत्मनेपदं भवति ।

च. अर्थविज्ञानस्य परिभाषां लिखत ।

2. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –

क. सूत्रद्वयं सोदाहरणं व्याख्येयम् –

। वर्तमाने लट् । झोऽन्तः । एरूः। कर्तरि कर्म व्यतिहारे ।

ख. सूत्रद्वारा चत्वारि पदानि साधनीयानि –

भवति । एधते । भवतु । एधताम । पराकरोति। विरमति । निविशते । पुत्रीयति

3. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –

क. सूत्रद्वयं सोदाहरणं व्याख्येयम् -

सम्बोधते च । कर्मणि द्वितीया । स्वतन्त्रः कर्ता । कर्तृकरणयोस्तृतीया ।

ख. सूत्रद्वारा चत्वारि रेखांकितपदानि साधनीयानि –

<u>ग्रामाद्</u> आयाति । <u>कटे</u> आस्ते । नमः <u>कृष्णाय</u> । <u>बलिं</u> याचते वसुधाम् । <u>हरिं</u> भजति।

मोक्षे इच्छा अस्ति ।

4. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –

क. सूत्रद्वयं सोदाहरणं व्याख्येयम् –

अचो यत् । कृत्य-ल्युटो बहुलम् । दन्त उन्नत उरच् । अजाऽद्यतष्टाप् ।

ख. सूत्रद्वारा चत्वारि पदानि साधनीयानि –

अजा । गोपस्य स्त्री गोपी । युवतिः। दन्तुरः । गोमान्। लोमशः। चेयम्। शिष्यः

4. **व्याख्यात्मकः** प्रश्नः –

क. भारतीयार्याभाषायाः परिचयः प्रदेयः ।

ख. वाक्यविज्ञानस्य स्वरूपं विवेचयत ।

## स्नातकोत्तर संस्कृतम्

*(M.A. SAMSKRIT) 2nd Sem* **द्वितीयं सत्रम्**

**द्वितीयपत्रम् - व्याकरणम्**

**प्रदत्तकार्यम्** – 2 **अङ्काः**
- 15

**निर्देशः** - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।

1. **पञ्चप्रश्नानां** संक्षेपेण उत्तरं प्रदेयम् –
   क. भूधातोः लिट् लकारस्य रूपाणि लिखत ।
   ख. एध् धातोः लुट् लकारस्य रूपाणि लिखत ।
   ग. वर्तमाने लट् सूत्रस्य कः अर्थः ? सोदाहरणं लिखत ।
   घ. सप्तमीविभक्तिविधायकसूत्रं किम् ?
   ङ. 'व्यतिलुनीते' अत्र केन सूत्रेण आत्मनेपदं भवति ।
   च. वाक्यविज्ञानस्य परिभाषां लिखत ।
2. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –
   क. सूत्रद्वयं सोदाहरणं व्याख्येयम् –
   अतो दीर्घो यञि । कर्तरि शप्। धि च । झस्य रन् ।
   ख. सूत्रद्वारा चत्वारि पदानि साधनीयानि –
   भवामि । एधेते । भवन्तु । एधै । प्रतिष्ठते । अपजानीते ।
अभिक्षिपति । राजीयति
3. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –

क. सूत्रद्वयं सोदाहरणं व्याख्येयम् –

चतुर्थी संप्रदाने। आधारोऽधिकरणम्। स्वतन्त्रः कर्ता । यतश्च निर्धारणम्।

ख. सूत्रद्वारा चत्वारि रेखांकितपदानि साधनीयानि –

रामेण सह सीता वनं गच्छति । स्थाल्यां पचति। तण्डुलानोदनं पचति ।

बलिं याचते वसुधाम् । तटः तटी तटम्। विप्राय गां ददाति।

4. **सूत्रव्याख्या रूपसिद्धिः च** करणीया –

क. सूत्रद्वयं सोदाहरणं व्याख्येयम् –

पोरदुपधात् । उगितश्च । अत इनि-ठनौ । वाचो ग्मिनिः ।

ख. सूत्रद्वारा चत्वारि पदानि साधनीयानि –

अहंयुः । स्नानीयं चुर्णम् । मृज्यः। अर्शसः । कुरु-चरी। कुमारी। अति-केशी। शिष्यः

4. **व्याख्यात्मकः एकः** प्रश्नः समाधेयः –

क. अर्थविज्ञानस्य परिचयः प्रदेयः ।

ख. वाक्यविज्ञानस्य स्वरूपं विवेचयत ।

**एम॰ ए॰ संस्कृतम्**

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

सप्तमं पत्रम् (msk 09) - **काव्यं नाटकञ्च**

**प्रदत्तकार्यम्-1** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. मेघदूतम् इति खण्डकाव्यं कस्य कवेः रचना अस्ति ?

ख. किरातार्जुनीये महाकाव्ये कति श्लोकाः सन्ति ?

ग. युधिष्ठिरः वनेचरं कुत्र प्रेषयति ?

घ. महाकविभवभूतिना विरचितानि नाटकानि कानि सन्ति ?

ङ सीतां प्रति प्रसृतं लोकापवादं कः सूचयति ?

च. उत्तररामचरितस्य तृतीयाङ्कस्य किं नाम ?

**2.** क. निर्धारितस्य खण्डकाव्यस्य श्लोकेषु स्वयमेव श्लोकानां चयनं कृत्वा द्वयोः श्लोकयोः व्याख्या विधेया ।

ख. महाकवेः कालिदासस्य परिचयं लिखत ।

**3.** क. किरातार्जुनीयं महाकाव्यस्य प्रथमसर्गस्य सारं लिखत ।

ख. महाकवेः भारवेः परिचयं प्रयच्छत ।

**4.** क. उत्तररामचरितस्य तृतीयाङ्कस्य कथावस्तोः संक्षेपेण परिचयं प्रयच्छत ।

ख. वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे । अस्याः पङ्क्तेः व्याख्या विधेया ।

**5.** क. उत्तररामचरितस्य गर्भाङ्कस्यसारं लिखत ।

ख. उत्तररामचरितनाटके महाकवेः भवभूतेः काव्यसौष्ठवं वर्णयत ।

**एम॰ ए॰ संस्कृतम्**

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

सप्तमं पत्रम् (msk 09) - **काव्यं नाटकञ्च**

**प्रदत्तकार्यम्-2.** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. मेघदूते अलकानगर्यां स्थितं बाह्योद्यानं नाम किम् ?

ख. किरातार्जुनीयम् इति अस्य पदस्य व्युत्पत्तिः विधेया ।

ग. वर्णिलिङ्गी कः ?

घ. उत्तररामचरिते नाटके विदूषकः कः ?

ङ लौकिकानां हि साधूनाम् अर्थं वाक् अनुवर्तते इति कस्येयम् उक्तिः ?

च. उत्तररामचरितस्य पञ्चमाङ्कस्य किं नाम ?

**2.** क. निर्धारितस्य गीतिकाव्यस्य श्लोकेषु स्वयमेव श्लोकानां चयनं कृत्वा द्वयोः श्लोकयोः व्याख्या विधेया ।

ख. उत्तरमेघस्य संक्षेपेण सारं लिखत ।

**3.** क. किरातार्जुनीयं महाकाव्यस्य सारं लिखत ।

ख. महाकवेः भारवेः जीवनचरितं कृतित्वं च विस्तरेण लिखत ।

**4.** क. उत्तररामचरितस्य द्वितीयाङ्कस्य कथावस्तोः संक्षेपेण परिचयं प्रयच्छत ।

ख. एको रसः करुण एव निमित्तभेदात् । अस्याः पङ्क्तेः व्याख्या विधेया ।

**5.** क. उत्तररामचरितस्य सारं लिखत ।

ख. महाकवेः भवभूतेः परिचयं प्रयच्छत ।

**स्नातकोत्तर संस्कृतम्**

***(M.A. SAMSKRIT) 2nd Sem*** **द्वितीयं सत्रम्**

**पत्रम् – दर्शनम्** (Msk10)

**प्रदत्तकार्यम्** – 1 **अङ्काः** - 15

**निर्देशः** - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः

1. **पञ्चप्रश्नानां** संक्षेपेण उत्तरं प्रदेयम् –

    1. तर्कसंग्रहे कति पदार्था ?
    2. तर्कसंग्रहमतानुसारं कति गुणाः?
    3. अज्ञानस्य लक्षणं लिखत ?

4. वेदान्तसारस्य लेखकः कः वर्तते ?

5. साधनचतुष्ट्यं नाम किम ? लिखत ।

6. आप्तः कः ?

7. कति द्रव्याणि ?

8. आर्थीभावनायाः लक्षणं लिखत ?

2. **त्रयाणां व्याख्या** संस्कृतमाध्यमेन विधेया –

क. समवायिकारणम् ? ख. प्रत्यक्षप्रमाणम् ?

ग. अनुमानप्रमाणम् ? घ. शब्दप्रमाणम् ?

3. **त्रयाणां व्याख्या** संस्कृतमाध्यमेन विधेया –

क. अज्ञानम् । ख. अधिकारिस्वरूपम् ।

ग. समाधिः । घ. सूक्ष्मशरीरोत्पत्तिः।

4. **द्व्योः** व्याख्या विधेया -

क. शाब्दीभावना । ख. विनियोगविधिः । ग. प्रयोगविधिः घ. अधिकारविधिः।

5. **द्व्योः** व्याख्या विधेया –

क. नामधेयस्य स्वरूपम् । ख. अर्थवादविचारः । ग . निषेधस्य लक्षणं स्वरूपम् च ।

**स्नातकोत्तर संस्कृतम्**

***(M.A. SAMSKRIT) 2nd Sem*** **द्वितीयं सत्रम्**

**पत्रम् - दर्शनम्**

**प्रदत्तकार्यम् – 2** **अङ्काः - 15**

**निर्देशः** - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः

1. **पञ्चप्रश्नानां** संक्षेपेण उत्तरं प्रदेयम् –

1. तर्कसंग्रहस्य लेखकः कः ?

2. तर्कसंग्रहमतानुसारं कति द्रव्याणि ?

3. अधिकारि-लक्षणं लिखत ?

4. वेदान्तो नाम किम् ?

5. अनुबन्धचतुष्ट्यं नाम किम ? लिखत ।

6. मीमांसानुसारं धर्मस्य किम् लक्षणम् ?

7. अर्थसंग्रहस्य लेखकः कः ?

8. शाब्दीभावनायाः लक्षणं लिखत ?

2. **त्रयाणां व्याख्या** संस्कृतमाध्यमेन विधेया –

क. नवद्रव्याणि ? ख. प्रत्यक्षप्रमाणम् ?

ग. अनुमानप्रमाणम् ? घ. शब्दप्रमाणम् ?

3. **त्रयाणां व्याख्या** संस्कृतमाध्यमेन विधेया –

क. अज्ञानम् । ख. अधिकारिस्वरूपम् ।

ग. समाधिः । घ. सूक्ष्मशरीरोत्पत्तिः।

4. **द्व्योः** व्याख्या विधेया -

क. आर्थीभावना । ख. विनियोगविधिः । ग. प्रयोगविधिः घ. अधिकारविधिः।

5. **द्व्योः** व्याख्या विधेया –

क. नामधेयस्य विस्तरेण स्वरूपम् विवेचनीयम्।

ख. अर्थवादविचारस्य प्रतिपादनं कुरुत ।

ग . निषेधस्य लक्षणं स्वरूपम् च विवेचयत।

**स्नातकोत्तर संस्कृतम्**

***(M.A. SAMSKRIT) 2nd Sem*** **द्वितीयं सत्रम्**

**धर्मतन्त्रागमः** (Msk11)

**प्रदत्तकार्यम् – 1** **अङ्काः - 15**

1. पञ्च प्रश्नाः संस्कृतमाध्यमेन समाधेयाः -
   i. मनुस्मृत्यनुसारेण ब्राह्मणस्य कर्माणि वर्णयत ।
   ii. को नाम पुंसवनसंस्कारः

iii. धर्मस्य का परिभाषा ?

iv. का नाम श्रुतिः?

v. व्यवहारस्य सामान्यलक्षणं किम्?

vi. साहसस्य लक्षणं किम् ?

vii. वाक्यपारुष्यस्य सामान्य लक्षणं किम् ?

viii. याज्ञवल्क्यानुसारेण व्यवहारनिर्णये कति प्रमाणानि सन्ति ?

2. मनुस्मृतिग्रन्थस्य प्रथमोऽध्यायस्य श्लोकानां सारः विस्तरेण लेखनीयः ।

3. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायस्य आरम्भतः दायभागपर्यन्तं सारः लेखनीयः ।

**स्नातकोत्तर संस्कृतम्**

*(M.A. SAMSKRIT) 2nd Sem* **द्वितीयं सत्रम्**

**धर्मतन्त्रागमः**

**प्रदत्तकार्यम्** – 2 **अङ्काः** - 15

1. पञ्च प्रश्नाः संस्कृतमाध्यमेन समाधेयाः -
    i. मनुस्मृत्यनुसारेण संस्कारविधिः वर्णयत ।
    ii. मनुस्मृत्यनुसारेण विवाहस्य स्वरूपं लक्षणं च वर्णयत ।
    iii. मनुस्मृत्यनुसारेण गृहस्थस्य के नियमाः ? विवेचयत ।
    iv. मनुस्मृत्यनुसारेण वानप्रस्थस्य के धर्माः ? स्पष्टयत ।
    v. याज्ञवल्क्यानुसारेण वेतनादानस्य किम् स्वरूपं ? लिखत ।
    vi. याज्ञवल्क्यानुसारेण सीमाविवादं किं भवति ? लिखत ।
    vii. याज्ञवल्क्यानुसारेण दण्डपारुष्यस्य सामान्य लक्षणं किम् ? विवेचयत ।
    viii. याज्ञवल्क्यानुसारेण व्यवहारनिर्णये कति प्रमाणानि सन्ति ?
2. मनुस्मृतिग्रन्थस्य द्वितीयोऽध्यायस्य सारः विस्तरेण लेखनीयः ।
3. याज्ञवल्क्यस्मृतेः व्यवहाराध्यायस्य सीमाविवादप्रकरणतः आरभ्य अन्तपर्यन्तं सारः लेखनीयः ।

**एम॰ ए॰ संस्कृतम्**

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

द्वादशं पत्रम् (msk 12-b) - **वैदिकसाहित्यस्य इतिहासः**

**प्रदत्तकार्यम्-1** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. कति वेदाःसन्ति, के च ते ?

ख. महर्षिः पतञ्जल्यानुसारं चतुर्णामपि वेदानां कियत्यः शाखाः ?

ग. सामवेदस्य कति ब्राह्मणग्रन्थाः ? नामानि लिखत ।

घ. ऋग्वेदेन सन्बद्धाः के के आरण्यकग्रन्थाः ?

ङ उपनिषद् शब्दस्य व्युत्पत्तिः विधेया ।

च. वेदपुरुषस्य श्रोत्रं किम् ?

**2.** क. ऋग्वेदसंहितायाः अथवा यजुर्वेदसंहितायाः विस्तरेण परिचयं प्रयच्छत ।

ख. वेदानां कः रचनाकालः ? स्पष्टयत ।

**3.** क. चतुर्णामपि वेदानां ब्राह्मणग्रन्थानां परिचयं प्रयच्छन् कमपि एकं ब्राह्मणग्रन्थं विस्तरेण वर्णयत ।

ख. चतुर्णामपि वेदानां आरण्यकग्रन्थानां सामान्यं परिचयं प्रयच्छत ।

**4.** क. चतुर्णामपि वेदानाम् उपनिषद् ग्रन्थानां सामान्यं परिचयं प्रयच्छत ।

ख. ईशोपनिषदः सारः संस्कृतेन लिखत ।

**5.** क. कति वेदाङ्गानि ? सामान्यं परिचयं प्रयच्छत ।

ख. व्याकरणवेदाङ्गं वैशद्येन वर्णयत ।

प्रथमं वर्षम् ( द्वितीयं सत्रम् )

द्वादशं पत्रम् (msk 12-b) - **वैदिकसाहित्यस्य इतिहासः**

**प्रदत्तकार्यम्-2** **अङ्काः - 15**

**निर्देशः - सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः ।**

**1. पञ्चप्रश्नानां संक्षेपेण उत्तरं संस्कृतेन प्रदेयम् -**

क. वेदस्य का परिभाषा ? व्युत्पत्तिः विधेया ।

ख. वेदेषु कति विकृतयः प्रोक्ता, के च ते ?

ग. अथर्ववेदस्य कति ब्राह्मणग्रन्थाः ? नामानि लिखत ।

घ. अरण्याध्ययनात् एतत् आरण्यकम् इति कस्येयम् उक्तिः ?

ङ ऋग्वेदसम्बद्धाः उपनिषद्ग्रन्थाः के ?

च. ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति केनोक्तम् ?

**2.** क. सामवेदसंहितायाः अथवा अथर्ववेदसंहितायाः विस्तरेण परिचयं प्रयच्छत ।

ख. वेदानां किं वैशिष्ट्यम् ? स्पष्टयत ।

**3.** क. ब्राह्मणग्रन्थानां प्रतिपाद्यविषयं वर्णयत ।

ख. यजुर्वेदस्य आरण्यकग्रन्थानां विस्तरेण परिचयं प्रयच्छत ।

**4.** क. उपनिषदां किं वैशिष्ट्यं ? स्पष्टयत ।

ख. कठोपनिषदः सारं संस्कृतेन लिखत ।

**5.** क. वेदाङ्गानां किं वैशिष्ट्यं ? स्पष्टयत ।

ख. कल्पवेदाङ्गस्य वैशद्येन परिचयं प्रयच्छत ।